गस्य निषिद्धत्वेन तत्प्रयोगस्य पापजनकत्वं सूचितम्। भावे ल्युट्। २दुःखेन पतने न०।

**दुष्पत्र** पु० दुःसहं पत्रमस्य प्रा०ब०। चोरनामगन्धद्रव्ये अमरः

**दुष्पद** त्रि० दुःखेन पद्यते दुर्+पद–कर्मणि खल्। दुःखेन प्राप्ये प्राप्तुमशक्ये “सुतो हि चक्रेण रथ्या दुष्पदा ह्यणक्” ऋ० १।५३।८ ‘दुष्पदा दुष्पदेन प्राप्तुमशक्येन चक्रेण” भा० तृतीयास्थाने छान्दस आच्।

**दुष्पराजय** त्रि० दुःखेन पराजीयतेऽसौ दुर्+परा+जि कर्मणि खल्। १जेतुमशक्ये दुःखेन जेतव्ये २धृतराष्ट्र पुत्रभेदे पु० “उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः” भा०आ० ११७अ० तत्पुत्रोक्तौ।

**दुष्परिग्रह** त्रि० दुःखेन परिगृह्यतेऽसौ दुर्+परि+ग्रह–कर्मणि खल्। १परिग्रहीतुमशक्ये “लोकाधाराः श्रियो राज्ञां दुरापा दुष्परिग्रहाः” कामन्द०। प्रा०स०। २निन्द्यभार्य्यायाञ्च। दुःस्थितः परिग्रहो भार्या यस्य प्रा०ब०। ३दुष्टभार्य्यके पु०

**दुष्परिहन्तु** त्रि० दुर्+परि+हन–खलर्थे तुन्। १दुःखेन नाशयितव्ये २दुष्परिहार्य्ये च “यच्छता नो दुष्परिहन्तु शर्म्म” ऋ०२।२३।६ “दुष्परिहन्तु हन्तुमशक्यम्” भा०

**दुष्पर्श** त्रि० दुर्+स्पृश–कर्मणि खल् वा विसर्गलोपः। १दुःखेन स्पर्शनीये स्प्रष्टुमशक्ये २दुरालभायां स्त्री अमरः तत्रार्थे पु० भरतः।

**दुष्पान** त्रि० दुःखेन पीयतेऽसौ “आतो युच्” पा० खलर्थे कर्मणि युच्। दुःखेन पेये १पातुमशक्ये। भावे युच्। २दुःखेन पाने न०।

**दुष्पुरुष** पु० प्रा०स०। निन्द्ये पुरुषे ततः ब्राह्मणा० स्वार्थे भावे कर्मणि वा ष्यञ्। दौष्पुरुष्य तदर्थे पु० तद्भावे तत्कर्मणि तु न०।

**दुष्पूर** त्रि० दुर्+पूरि–कर्मणि खल्। १पूरयितुमशक्ये दुःखेन पूरणीये। “काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः” गीता २अनिवार्य्ये च “कामरूपेण कौन्तेय! दुष्पूरेणानलेन च” गीता

**दुष्प्रकाश** त्रि० दुष्टः प्रकाशः प्रा०स०। विरोधिलक्षणया अन्धकारे “पापस्य लोको निरयो दुष्प्रकाशो नित्यं दुःखं शोकभूयिष्ठमेव” भा०शा० ७३अ०।

**दुष्प्रकृति** त्रि० दुःस्था प्रकृतिरस्य प्रा०ब०। १दुष्टस्वभावे “त्वं तु दुष्प्रकृतिर्मूढो महायुद्धेष्वकोविदः” भा०क० ४०अ०। प्रा०स०। २निन्द्यायां प्रकृतौ निन्द्ये स्वभावे स्त्री

**दुष्प्रजस्** त्रि० दुःस्था प्रजाऽस्य असिच् समा०। १निन्द्यप्रजायुक्ते। प्रा०स०नासिच्। दुष्प्रजा २निन्द्यप्रजायां स्त्री

**दुष्प्रज्ञान** त्रि० दुःखेन प्रज्ञायतेऽसौ दुर्+प्र+ज्ञा–खलर्थे कर्मणि युच्। १ज्ञातुमशक्ये। दुष्टं प्रज्ञानं प्रा०स०। २निन्द्ये ज्ञाने न० “दुष्प्रज्ञानेन निरयाः बहवः समुदाहृताः” भा०शा० १२७अ०।

**दुष्प्रधर्ष** त्रि० दुष्करः प्रधर्षोऽस्य प्रा०ब०। १धर्षयितुमशक्ये दुःखेन धर्षणीये “सा दुष्प्रधर्षा मनसाऽप्यहिंस्रैः” रघुः। २दुरालभायां ३खर्ज्जूर्य्याञ्च स्त्री राजनि०। ४धृतराष्ट्रपुत्रभेदे पु० “दुर्मुखो दुष्प्रधर्षश्च विवित्सुर्विकटः समः” भा०भो० ६४अ०। तत्र दुष्प्रहर्षश्चेति पाठान्तरम् भा०आ० ६४अ० तत्पुत्रोक्तौ तयोक्तेः

**दुष्प्रधर्षण** त्रि० दुर्+प्र+धृष–भाषायां युच्। १दुःखेन धर्षणीये धर्षयितुमशक्ये। ‘‘विन्दानुविन्दौ दुर्द्धर्षः सुवाहुर्दुष्प्रधर्षणः” भा०आ० ६७ उक्ते २धृतराष्ट्रपुत्रभेदे पु० ३वार्त्ताक्याम् स्त्री अमरः गौरा० ङीष्।

**दुष्प्रधर्षिणी** स्त्री दुष्प्रधर्षोऽस्त्यस्याः इनि ङीप्। १कण्टकार्य्यां राजनि० २वृहत्याम् भावप्र०।

**दुष्प्रवृत्ति** स्त्री प्रा०स०। दुष्टायां प्रवृत्तौ वार्त्तायां “तेषां सूर्पणखैवैका दुष्प्रवृत्तिहराऽभवत्” रघुः।

**दुष्प्रवेश** त्रि० दुष्करः प्रवेशोऽत्र प्रा०ब०। १दुःखेन प्रवेश्ये प्रवेष्टुमशक्ये ‘‘महर्षिगणसम्बाधं ब्राह्म्या लक्ष्म्या समन्वितम्। दुष्प्रवेशं महाराज! नरैर्धर्म्मबहिष्कृतैः” भा०व० १४५अ०। २कन्थारीवृक्षे स्त्री राजनि०।

**दुष्प्रहर्ष** त्रि० दुष्करः प्रहर्षोऽस्य प्रा०ब०। १दुष्करप्रहर्षयुक्ते २धृतराष्ट्रपुत्रभेदे पु० दुर्मदो दुष्प्रहर्षश्च विवित्सुर्विकटः समः” भा०आ० ६७अ०। तत्पुत्रोक्तौ

**दुष्म(ष्य)न्त** पु० १पौरवे भरतपितरि राजभेदे ‘‘“उपदानवी सुतान् लेभे चतुरस्त्वैलिकात्मजान्। दुष्मन्तमथ सुष्मन्तं प्रवीरमनघं तथा। दुष्मन्तस्य तु दायादो भरतो नाम वीर्य्यवान्। स सर्वदमनो नाम नागायुतबलो महान्। चक्रवर्त्ती सुतोजज्ञे दुष्मन्तस्य महात्मनः। शकुन्तलायां भरतोयस्य नाम्ना स्म भारताः। दुष्मन्तं प्रति राजानं वागुवाचाशरीरिणी। माता भस्त्रा पितुः पुत्रो येन जातः सएव सः। भरस्व पुत्रं दुष्मन्त! माऽवमंस्थाः शकुन्तलाम्। रेतोधाः पुत्र उन्नयति नरदेव! यमक्षयात्। त्वञ्चास्य धाता गर्भस्य सत्यमाह शकुन्तला” हरिवं० ३२अ०। अस्य शकुन्तलापरिवेदनकथा शकुन्तलाशब्दे दृश्या